वर्षम् - ०२ अङ्कः - ०२ शोधज्योतिः
जनवरी-दिसम्बर, २०२० ISSN-2350-0700

# पदविधित्वं तत्त्रत्या वृत्तिश्च

**सुश्री विदुषी बोल्ला**[१]

व्याकरणशास्त्रं नाम पदशास्त्रम्। शास्त्रञ्च सूत्रमेव। तेनैव सिद्धीनां साधनात्। तच्च शास्त्रं षड्विधत्वेन ख्यातम्। तेषु षड्विधेषु सूत्रेषु सर्वाधिकं सूत्रं विधिसूत्रमेव। तेष्वपि विधिसूत्रेषु पदविधिसूत्राणां महत्त्वं न तिरोहितं केषाञ्चित्। को नाम पदविधिः? कुत्र च पदविधिनिष्ठा उद्देश्यता? तस्मिन् एव विचारप्रसङ्गे वृत्तिषु अन्यतमः शक्तिसन्दर्भः, स च कः? कतिविधश्च सः? तत्स्वरूपञ्च किम्? इत्यादिकं शाब्दिकरीत्या निबन्धेऽस्मिन् मया प्रस्तूयते। तदेतत्सन्दर्भे पाणिन्यष्टाध्याय्याः द्वितीयाध्यायस्य प्रथमपादस्य प्रथमसूत्रं 'समर्थः पदविधिः'[२] इति स्मर्यते। तदेवानुसृत्य निम्नलिखिताः अंशाः विमृश्यन्ते -

**१. समर्थः कः?**

**२. कः पदविधिः?**

**३. व्यपेक्षात्वं किम् ?**

**४. एकार्थीभावत्वं किम् ?**

**५. अत्र व्यपेक्षैकार्थीभावयोः विशेषः ।**

**६. निष्कर्षः ।**

**१. समर्थः कः?-** समर्थो नाम सामर्थ्यवान् इति। सामर्थ्यञ्च शक्तिः। अत्र शक्तिर्द्विविधा एकार्थीभावव्यपेक्षाभेदेन। तत्र स्वार्थपर्यवसायिनां शब्दानामाकाङ्क्षावशाद् यः परस्परं सम्बन्धः सा व्यपेक्षा, सा च वाक्ये एव। समासादिवृत्तौ तु एकार्थीभावरूपं सामर्थ्यम्,एतदेव 'समर्थः पदविधिः' इति सूत्रे समर्थपदेन गृह्यते। तदुक्तं 'समर्थ' सूत्रे भाष्ये - 'किं समर्थन्नाम। पृथगर्थानामेकार्थीभावः समर्थवचनम्। पृथगर्थानां पदानामेकार्थीभावः समर्थमित्युच्यते। क्व पुनः पृथगर्थानि, क्वैकार्थानि। वाक्ये पृथगर्थानि-

---

[१] सहायकाचार्या, व्याकरणविभागः, श्रीसोमनाथसंस्कृतविश्वविद्यालयः, वेरावलम्, गुजरातम्, पिं - ३६२२६६

[२] २-१-१ पाणिनीयाष्टाध्याय्यां पृ॰स॰-९

राज्ञः पुरुष इति। समासे पुनरेकार्थानि - राजपुरुष इति'[१]। प्रकृतसूत्रे भाष्यकारैः अनेकधा उक्तेषु पक्षेषु जहत्स्वार्थाऽजहत्स्वार्थपक्षयोरेवैकार्थीभावव्यपेक्षात्वेन पर्य्यवसीयते। तत्र 'भेदसंसर्गौ वा सामर्थ्यम्' इति भाष्यस्य राजादिपदसमभिव्याहृतपुरुषादिपदेन राजादिविशिष्टपुरुषादिरूपविशिष्टार्थस्यैव बोध इत्यभिप्रायः, न तु भेदे पृथक्शक्तिबोधकं तत्, तादृशबोधाननुभवात्, 'रामकृष्णौ' इत्यादिद्वन्द्वे भेदस्य वाच्यताया दुरुपपादत्वाच्च। भेदसंसर्गयोः सामर्थ्यस्य च तादात्म्यात्, तेषां प्रतीतिर्जायते। तदेवोक्तं कैयटैः - 'यदि च वृत्तौ भेदसंसर्गौ न स्याताम्, तदा सामर्थ्यमेव न स्यात्, तदात्मकत्वात् सामर्थ्यस्येत्यर्थः'। तत्र संसर्गाविनाभावित्वादनुमीयमानसंसर्गो भेदः सामर्थ्यमिति भेदः समासवाच्यः। भेदाविनाभावित्वादनुमीयमानभेदः संसर्गो वा सामर्थ्यमिति संसर्गः समासवाच्यः। तत्र भेदपक्षे राजा पुरुषं स्वाम्यन्तरेभ्यो निवर्त्य स्वार्थं जहाति। पुरुषस्तु अजहत् अपि स्वार्थं स्वान्तरेभ्यो राजानं निवर्त्तयति। एवम् 'राज्ञः' इत्युक्ते सर्वं स्वं प्रसक्तम्, 'पुरुष' इत्युक्ते सर्वः स्वामी प्रसक्तः। 'राजपुरुषः' इत्युक्ते राजा स्वत्वेन पुरुषमेव सम्बध्नाति नान्यम्, पुरुषः स्वामित्वेन राजानमेव सम्बध्नाति नान्यम् इति संसर्गः समासार्थः । उभौ वा यौगपद्येनाश्रीयमाणौ सामर्थ्यमित्युभयं समासार्थो भवति ।

२. **कः पदविधिः? -** पदविधिघटकविधिपदं कर्म्मसाधनपरं, विधीयते इति विधिः[२], तथा च शेषषष्ठ्या समासो विधीयते। विधानं विधिरिति रीत्या विधिशब्दस्य भावसाधनत्वे तु तस्य कर्म्मषष्ठ्यन्तेन पदशब्देन समासे सति पदकर्म्मकं विधानमित्यर्थः स्यात्, स च नोपपद्यते, समासादिविधानस्य पदकर्म्मकविधानत्वाभावात्, समर्थपदसामानाधिकरण्यानुपपत्तेश्च। अतः शेषषष्ठ्यन्तेन कर्म्मसाधनस्य समास आस्थितः। कृत्तद्धितसमासैकशेषसनाद्यन्तधातुरूपा विधयः पदविधिशब्देन गृह्यन्ते। इम एव पञ्च वृत्तिपदेनापि व्यवह्रियन्ते। वृत्तिर्नाम परार्थाभिधानम्। विग्रहवाक्यावयवपदार्थेभ्यः परोऽन्यो योऽयं विशिष्टैकार्थः तत्प्रतिपादिका वृत्तिरित्यर्थः। प्रक्रियादशायां प्रत्येकमर्थवत्त्वेन प्रथमं विगृहीतानां पदानां समुदायशक्त्या विशिष्टैकार्थप्रतिपादिका वृत्तिः भवति।

ननु पदविधिशब्देन प्रकृतसूत्रे पदनिष्ठोद्देश्यतानिरूपितविधेयताश्रयत्वं गृह्येत, तदा 'राजपुरुष' इत्यत्र पदं = सुबन्तपदं, तन्निष्ठोद्देश्यतानिरूपितविधेयताश्रयत्वात् समासस्य पदविधित्वं बुद्ध्यते। किन्तु

---

[१] पृ॰ स॰ १७, व्याकरणमहाभाष्ये

[२] पृ॰ स॰ २, व्याकरणमहाभाष्ये

'धातोः कर्म्मणः समानकर्त्तृकादिच्छायां वा'[1] इति विहितस्य सनः पदविधित्वानापत्तिः, निरुक्तपदविधित्वाभावात्। अत एव पदविधिसहचरितोऽपि[2] पदविधिशब्देन गृह्यते शेखरे नागेशपादैः। पदविधिसहचरितत्वञ्च स्वविधायकशास्त्रघटितपादघटकशास्त्रविधेयत्वम्। यथा - स्वम् = क्यच्, तद्विधायकं = शास्त्रं 'सुपः आत्मनः क्यच्'[3] इति, तद्घटकस्तृतीयाध्यायस्य प्रथमः पादः, तद्घटकं = शास्त्रं 'धातोः कर्म्मणःसमानकर्त्तृकादिच्छायां वा'[4] इति, तद्विधेयत्वं = सन् इति सनः पदविधिसहचरितत्वेन तत्रापि समर्थपरिभाषोपस्थितिः स्यात्। तथा च विजयाव्याख्यायाममुं परिष्क्रियते - पदसञ्ज्ञाप्रयोजकप्रत्ययोत्पत्तिप्रयोजकसञ्ज्ञानिष्ठविधेयतानिरूपितोद्देश्यतावच्छेदकसम्पादकशास्त्रविधेय स्यैव पदविधिरिति। तथा च कृत्तद्धितसमाससनाद्यन्तधातुरूपचतसृणां वृत्तीनां पदविधित्वेन सामर्थ्यनिमित्तकत्वं सिद्ध्यति। तथाहि - पदसञ्ज्ञाप्रयोजकाः प्रत्ययाः = कप्प्रत्ययावधिकयजादिभिन्न-स्वादयस्तिङश्च, तादृशप्रत्ययोत्पत्तिप्रयोजकसञ्ज्ञा = प्रातिपदिकसञ्ज्ञा धातुसञ्ज्ञा च, 'प्रातिपदिकादि'[5] -त्यधिकृत्य कप्प्रत्ययावधिकस्वादीनाम्, 'धातो'[6] रित्यधिकृत्य तिङश्च विधानात्। प्रातिपदिक-सञ्ज्ञाधातुसञ्ज्ञाऽन्यतरनिष्ठविधेयतानिरूपितोद्देश्यता = कृदन्ततद्धितघटितपदसनाद्यन्तसमाससञ्ज्ञाव -देतदन्यतमनिष्ठा तदवच्छेदकः = कृत्प्रत्ययः, तद्धितप्रत्ययः, समाससञ्ज्ञा, सनादिः, तत्सम्पादकं शास्त्रं = 'ण्वुल्तृचौ'[7], 'तस्यापत्यम्'[8], 'सह सुपा'[9], 'धातोः कर्म्मणः समानकर्त्तृकादिच्छायां वा'[10] इत्यादि, तद्विधेयत्वं = कृत्तद्धितसमाससन्नादिषु इति एतेषां पदविधित्वसम्पादनात्, एते सामर्थ्याश्रिताः सन्ति। अर्थात् यत्र सामर्थ्यं तत्रैव प्रवर्त्तन्ते।

---

[1] ३-१-७ पाणिनीयाष्टाध्याय्यां पृ॰स॰-१५

[2] लघुशब्देन्दुशेखरे पृ॰स॰ - ७८१

[3] ३-१-८ पाणिनीयाष्टाध्याय्यां पृ॰स॰ - १५

[4] २-१-१ पाणिनीयाष्टाध्याय्यां पृ॰स॰ - ९

[5] ङ्याप्प्रातिपदिकात् इति सूत्रम्, ४-१-१ पाणिनीयाष्टाध्याय्यां पृ॰स॰- २९

[6] ३-१-९१ पाणिनीयाष्टाध्याय्यां पृ॰स॰- १७

[7] ३-१-१३३ पाणिनीयाष्टाध्याय्यां पृ॰स॰- १८

[8] ४-१-९२ पाणिनीयाष्टाध्याय्यां पृ॰स॰- ३१

[9] २-१-४ पाणिनीयाष्टाध्याय्यां पृ॰स॰- ९

[10] ३-१-७ पाणिनीयाष्टाध्याय्यां पृ॰स॰- १५

यद्यपि एकशेषस्योक्तपदविधित्वं नास्ति, तथापि द्वन्द्वविषये एकशेषविधानात् 'उत्सर्गसमानदेशा अपवादाः' इति न्यायेनैकशेषस्यापि पदविधित्वेन सामर्थ्यविषयत्वं लभ्यते।

३. **व्यपेक्षात्वं किम्? -** स्वार्थपर्य्यवसायिनां पदानामाकाङ्क्षावशात्परार्थान्वयबोधकत्वं व्यपेक्षात्वम्। व्यपेक्षायाः अनर्थान्तरं वर्त्तते - अजहत्स्वार्थत्वम्। न जहति पदानि स्वार्थं यस्यां सा अजहत्स्वार्था वृत्तिरिति। व्यपेक्षायाः परिष्कारस्तु - यत्किञ्चित्पदविशिष्टत्वम् व्यपेक्षात्वमिति। वैशिष्ट्यञ्च स्वघटितत्व-स्वप्रयोज्यविषयतानिरूपितविषयताप्रयोजकपदघटितत्व-स्वप्रयोज्यविषयता-निरूपितत्वाभाववती या विषयता तादृशविषयताप्रयोजक पदाघटितत्वस्वनिष्ठशक्तिग्रहप्रयोज्य-शक्तिग्रहविषयीभूतशक्तिपर्य्याप्त्यनधिकरणत्वैतच्चतुष्टयसम्बन्धेन गृह्यते। समन्वयः 'राज्ञः पुरुषः' इत्यादिवाक्ये स्वम् = राजपदम्, तद्घटितत्वम् = 'राज्ञः पुरुषः' इत्यस्य। एवं द्वितीयसम्बन्धः वर्त्तते - 'स्वप्रयोज्यविषयतानिरूपितविषयताप्रयोजकपदघटितत्वमि'ति, अत्रापि स्वम् = राजपदम्, तत्प्रयोज्यविषयता = शाब्दबोधीयविषयता राजपदनिष्ठा तन्निरूपितविषयता = शाब्दबोधीयविषयता पुरुषपदनिष्ठा, तत्प्रयोजकं पदं पुरुषपदम्, तद्घटितत्वं = 'राज्ञः पुरुषः' इत्यस्य। तृतीयसंसर्गोऽस्ति - 'स्वप्रयोज्यविषयतानिरूपितत्वाभाववती या विषयता तादृशविषयताप्रयोजकपदाघटितत्वमि'ति, अत्र स्वम् = राजपदम्, तत्प्रयोज्यविषयता शाब्दबोधीया राजपदनिष्ठा विषयता, तन्निरूपितत्वाभाववती विषयता = उदासीनघटनिष्ठा विषयता, तादृशविषयताप्रयोजकं पदं = घटपदम्, तदघटितत्वम् = 'राज्ञः पुरुष'इत्यत्र। तुरीयः संसर्गो वर्त्तते - 'स्वनिष्ठशक्तिग्रहप्रयोज्यशक्तिग्रहविषयीभूतशक्ति-पर्य्याप्त्यनधिकरणत्वमि' ति, अत्राऽपि स्वम् = राजपदम्, तन्निष्ठशक्तिग्रहः = राजपदनिष्ठशक्तिग्रहः, तत्प्रयोज्यशक्तिग्रहः = राजपुरुषत्वावच्छिन्ननिरूपितसमुदायनिष्ठशक्तिग्रहः, तद्विषयीभूता शक्तिः = समुदायनिष्ठा शक्तिः, तत्पर्य्याप्त्यधिकरणत्वम् = राजपुरुष इत्यत्र, तदनधिकरणत्वम् = 'राज्ञः पुरुष' इत्यत्र।

४. **एकार्थीभावत्वं किम्? -** एकार्थीभाववत्वञ्च यत्किञ्चित्पदजन्यपृथगुपस्थितिविषयार्थकत्वेन दृष्टानां शब्दानां विशिष्टविषयैकशक्त्योपस्थितिजनकत्वम्। 'घट'पदेऽतिप्रसङ्गवारणाय 'दृष्टानामि'-त्यन्तनिवेशः क्रियते। 'औपगवा'दौ प्रत्ययानां तथादृष्टत्वाभावेनाव्याप्तिवारणाय 'यत्किञ्चित्पदे'ति ग्रहणं कृतम्। तथा च 'उपगोरपत्यमि'त्यादौ अपत्यपदजन्योपस्थितिविषयार्थकाण्पदघटितत्वेन एकार्थीभावत्वं

सिद्धम्। विभक्तिघटितेषु 'रामाभ्याम्' इत्यादिषु नातिव्याप्तिः, विभक्तिवाच्यवाचकशब्दान्तराभावादिति मञ्जूषाकारैः स्पष्टीकृतम्। किन्तु लक्षणमिदं चिन्त्यम्, लोमवल्लाङ्गूलावच्छिन्नवाचकपशुशब्दे, 'सत्कृत्यालङ्कृतां कन्यां यो ददाति स कूकुदः' इति पारिभाषिक'कूकुद'शब्दे चातिव्याप्तिः, अत एव एकार्थीभावं परिष्करोतिशक्तिविशिष्टत्वमेकार्थीभावत्वम्। वैशिष्ट्यञ्च - स्वपर्य्याप्त्यधि करणघटितत्व-स्वनिरूपकार्थेतरार्थनिरूपितशक्तिपर्य्याप्त्यधिकरणघटितत्व - स्वज्ञानप्रयोज्यज्ञानविषयशक्तिपर्य्याप्त्य-धिकरणत्वैतत्त्रितयसम्बन्धेन। लक्षणसमन्वयस्तु - 'राजपुरुषः' इत्यत्र राजपदनिष्ठराजत्वावच्छिन्न-निरूपितशक्तिविशिष्टं राजपुरुषपदस्य। स्वम् = राजत्वावच्छिन्ननिरूपिता शक्तिस्तत्पर्य्याप्त्यधिकरणम् = राजपदम्, तद्घटितत्वस्य, स्वनिरूपको = राजरूपोऽर्थः, तदितरोऽर्थः = पुरुषरूपः, तच्छक्तिपर्य्याप्त्य-धिकरणम् = पुरुषपदम् तद्घटितत्वस्य, स्वज्ञानम् = राजपदनिष्ठशक्तिज्ञानम्, तत्प्रयोज्यज्ञानम् = राजपुरुषत्वावच्छिन्ननिरूपितसमुदायनिष्ठशक्तिज्ञानम्, तद्विषया शक्तिः = समुदायनिष्ठा शक्तिः, तत्पर्य्याप्त्यधिकरणत्वस्य च 'राजपुरुषः' इति समुदायेऽक्षतत्वम्।

**५. अत्र व्यपेक्षैकार्थीभावयोः विशेषः**

**व्यपेक्षाशक्तिः**

- अवयवेषु शक्तिः, तच्छिक्तिज्ञानेन अवयवार्थोपस्थितिर्जायते।
- आकाङ्क्षादिज्ञानेन सम्बन्धस्योपस्थितिर्भवति।
- अवयवार्थातिरिक्त'विशेष'बोधनाय पृथग्वचनं कल्पनीयम्।
- अनेकावयवशक्तयः, आकाङ्क्षाज्ञानञ्चाऽऽवश्यकम्।
- शक्तः अवयवः, शक्यः अवयवार्थः, व्यपेक्षाशक्तिश्च अवयवशक्तिः।
- अवयवनिष्ठशक्तिज्ञानसमुदायनिष्ठशक्तिज्ञानयोः प्रयोज्यप्रयोजकभावसम्बन्धो न, अत्र समुदायशक्याभावात्।
- उपस्थितीययोः अवयवार्थनिष्ठविषयतासमुदायनिष्ठविषयतयोः शाब्दबोधीयविषयत्वा-भावात् निरूप्यनिरूपकभावसम्बन्धोऽपि न।

**एकार्थीभावशक्तिः**

- समुदाय एव शक्तिः, न त्ववयवेषु। अर्थात् अवयवेषु शक्तिसत्वेऽपि न तया उपस्थितिः।
- एकस्मिन् समुदाये एकशक्त्या एकविशिष्टार्थस्योपस्थितिर्जायते।
- अत्र शक्तः पदसमुदायः, शक्यः विशिष्टार्थः, शक्तिः एकार्थीभावश्च।
- एकार्थीभावेनैव सम्बन्धस्य, सम्बन्धिनः, अवयवार्थस्य चोपस्थितिः।
- अत्र विशेषे शक्तिग्रहाय पृथग्वचनस्यावश्यकता नाऽस्ति।
- राजनिष्ठशक्तिज्ञानराजपुरुषनिष्ठशक्तिज्ञानयोः प्रयोज्यप्रयोजकभावः सम्बन्धो वर्त्तते।
- राजनिरूपितपुरुषविषयकोपस्थितिसत्त्वात् राजोपस्थितिपुरुषोपस्थितीययोः निरूप्यनिरूपकभावः सम्बन्धः।

**६. निष्कर्षः**

शक्तिविषयकविचारणायां भगवत्पाणिनेः 'समर्थः पदविधिः'[१] इति सूत्रं नूनं स्मर्यते। अस्य पदमुद्दिश्य यो विधीयते समासादिः स समर्थः - विग्रहवाक्यार्थाभिधाने शक्तः सन् साधुरि[२] त्यर्थः भाष्याल्लभ्यते। पदोद्देश्यकविधित्वञ्च पदसञ्ज्ञाप्रयोजकप्रत्ययोत्पत्तिप्रयोजकसञ्ज्ञानिष्ठविधेयता-निरूपितोद्देश्यतावच्छेदकसम्पादकशास्त्रविधेयस्येति ग्रहणेन कृत्तद्धितसमासैकशेषसनाद्यन्तधातुरूपासु पञ्चस्वपि वृत्तिषूपपद्यते। सूत्रेऽस्मिन् समर्थो नाम सामर्थ्यवान् इत्यर्थः, सामर्थ्यमर्थात् शक्तिः। अस्याः एकार्थीभावव्यपेक्षेति भेदात् द्वैविध्यम्। तत्र पृथगर्थानां पदानामाकाङ्क्षादिवशाद् यः परस्परसम्बन्धः सः व्यपेक्षा। यथा - राज्ञः पुरुषः इति वाक्ये पृथगर्थाः = राजपदार्थः, पुरुषपदार्थश्च, एतेषां शक्त्या बोधकं पदम् = राजपदम्, पुरुषपदञ्च एतयोः आकाङ्क्षाज्ञानम् = षष्ठ्यन्तराजपदाऽव्यवहितोत्तरवर्ति-प्रथमान्तपुरुषपदत्वम्, प्रथमान्तपुरुषपदाऽव्यवहितपूर्ववर्तिषष्ठ्यन्तराजपदत्वमिति आकाङ्क्षाज्ञानम्, तदधीनपरस्परसम्बन्धः = स्वत्वसम्बन्धः, अयमेव सम्बन्धो व्यपेक्षा वर्त्तते। पक्षेऽस्मिन् अवयवार्थोपस्थितिः अवयवशक्त्या, तेषां सम्बन्धः आकाङ्क्षायोग्यताज्ञानाभ्यां जायते। तथा च स्वत्वसम्बन्धेन राजविशिष्टः पुरुषः इति बोधः। एवम् एकार्थीभावत्वञ्च अपृथगर्थानां पदानां विशेष्यविशेषणभावावगाह्युपस्थितिजनकत्वमिति। समन्वयस्तु - राज्ञः पुरुषः इत्यत्रोपस्थितपृथगर्थौ

[१] २-१-२ पाणिनीयाष्टाध्याय्यां पृ॰स॰- ९

[२] वैयाकरणभूषणसारे समासशक्तिनिर्णये पृ॰स॰- २७८

राजपदार्थपुरुषपदार्थौ, एतादृशपृथगर्थाभावपदे = राजपुरुषः इत्यस्य समस्तस्य राजपदपुरुषपदे, आभ्यां जायमानविशेष्यविशेषणभावान्वितार्थोपस्थितिः = विशिष्टार्थोपस्थितिः यथा - स्वत्वसम्बन्धेन राजविशिष्टः पुरुषः इत्युपस्थितिः, तज्जनिका राजपुरुषपदसमुदायनिष्ठा एकार्थीभावशक्तिः, तज्जनकत्वम् एकार्थीभावे इति। तस्मात् विशिष्टार्थोपस्थितिः समुदायशक्तिबोधजन्या, समुदायशक्तिबोधश्च विशिष्टार्थोपस्थितिजनको भवति। उभयत्र विशेषस्तु'राजपुरुषः' इति समासे उपस्थितीययोः राजनिष्ठपुरुषनिष्ठविषयतयोः निरूप्यनिरूपकभावः, ततो राजत्वावच्छिन्नविषयता-निरूपितपुरुषत्वावच्छिन्नविषयताकोपस्थितेः। अपि चात्र शक्तिज्ञानयोः राजपदनिष्ठराजपुरुष-पदसमुदायनिष्ठयोः प्रयोज्यप्रयोजकभावो वर्त्तते । एवञ्च 'राज्ञः पुरुषः' इति वाक्ये शाब्दबोधीययोः राजनिष्ठपुरुषनिष्ठविषयतयोः निरूप्यनिरूपकभावेऽपि उपस्थितीययोः तयोः निरूप्यनिरूपक-भावाभावः। एवमेवात्र राजपदनिष्ठराजपुरुषसमुदायनिष्ठशक्तिज्ञानयोः प्रयोज्यप्रयोजकभावोऽपि नास्ति, तत्र समुदायशक्तेरभावात्।

## सन्दर्भग्रन्थसूचिः

१. व्याकरणमहाभाष्यम्, सम्पादकः - श्रीगुरुप्रसादशास्त्री, प्रतिभाप्रकाशनम्, देहली, प्रथमसंस्करणम्, १९३८

२. पाणिनीयः अष्टाध्यायीसूत्रपाठः, सम्पादकः - श्री प॰ ब्रह्मदत्तजिज्ञासु, राधाप्रेस, देहली, सप्तदशं संस्करणम्, २००५

३. परमलघुमञ्जूषा, सम्पादको व्याख्याकारश्च - प्रो॰ बोधकुमारझाः, हंसाप्रकाशनम्, जयपुर, संस्करणम्, २०१८

४. लघुशब्देन्दुशेखरः, सम्पादकः - प्रो॰ बालशास्त्री, चौखम्बासुरभारतीप्रकाशनम्, वाराणसी, संस्करणम्, २०१३

५. समासस्तदव्ययीभावश्च, प्रो॰ बोधकुमारझाः, विद्यानिधिप्रकाशनम्, देहली, प्रथमसंस्करणम्, २०११

६. प्रौढनिबन्धसौरभम्, आचार्यविश्वनाथमिश्रः, राष्ट्रियसंस्कृतसाहित्यकेन्द्रम्, जयपुर, प्रथमसंस्करणम्, २००३

७. तत्त्वबोधिनीसमाख्यव्याख्यासंवलितासिद्धान्तकौमुदी, चौखम्बासंस्कृतप्रतिष्ठानम्, देहली, संस्करणम्, २०१०

८. वैयाकरणभूषणसारः प्रभादर्पणव्याख्याद्वयोपेतः, सम्पादकः - श्रीबालकृष्णपञ्चोली, चौखम्बा-संस्कृतसंस्थानम्, संस्करणम्, वि॰सं॰ २०६८, ई॰ २०१२

९. परमलघुमञ्जूषा, भावप्रकाशिका, बालबोधिनी संस्कृतहिन्दीव्याख्योपेता, व्याख्योपेता, व्यख्याकारः सम्पादकश्च - डा॰ जयशङ्करलालत्रिपाठी, चौखम्बाकृष्णदासअकादमी, वाराणसी, चतुर्थसंस्करणम्, २०११